## अम्बार्थनद्योर्ह्रस्वः । (१०७/२६७)

सम्बुद्धौ इति वर्तते। अम्बार्थानामङ्गानां [1]नद्यन्तानां ह्रस्वो भवति सम्बुद्धौ परतः। हे अम्ब। हे अक्क। हे अल्ल। नद्याः खल्वपि – हे कुमारि। [2]हे शार्ङ्गरवि। हे ब्रह्मबन्धु। हे वीरबन्धु।

[८६३] डलकवतीनां प्रतिषेधो वक्तव्यः। (म.भा.३.३४०)

हे अम्बाडे। हे अम्बाले। हे अम्बिके।

[८६४] छन्दसि वेति वक्तव्यम्।

हे अम्बाड, हे अम्बाडे। हे अम्बाल, हे अम्बाले। [3]हे अम्बिक, हे अम्बिके।

[८६५] तलो ह्रस्वो वा ङिसम्बुद्धयोरिति वक्तव्यम्।

देवते भक्तिः, देवतायां भक्तिः। हे देवत, हे देवते। छन्दस्येव ह्रस्वत्वमिष्यते।

[८६६] मातॄणां मातच् पुत्रार्थमर्हते। (म. भा. ३. ३४०)

मातॄणां मातजादेशो वक्तव्यः सम्बुद्धौ, पुत्राय पुत्रमभिधातुम्। कीदृशाय ? अर्हते। मात्रा व्यपदेशमर्हति श्लाघनीयत्वाद् यः पुत्रस्तदर्थम्। हे गार्गीमात। 'नद्यृतश्च' (५.४.१५३/८३३) इति समासान्तापवादो मातजादेशः। चित्करणमन्तोदात्तार्थम्॥

## ह्रस्वस्य गुणः। (१०८/२४२)

सम्बुद्धौ इति वर्तते। ह्रस्वान्तस्याङ्गस्य गुणो भवति सम्बुद्धौ परतः। हे अग्ने। [4]हे वायो। [5]हे पटो। हे कुमारि, हे ब्रह्मबन्धु इत्येवमादीनां ह्रस्वविधानसामर्थ्याद् गुणो न भवति। यदि गुणः [6]इष्टः स्यात्, 'अम्बार्थानां ह्रस्वः' इत्युक्त्वा 'नदीह्रस्वयोर्गुणः' इत्येवं ब्रूयात्॥

## जसि च। (१०९/२४१)

जसि परतो [7]ह्रस्वान्तस्याङ्गस्य गुणो भवति। अग्नयः। वायवः। [8]पटवः। धेनवः। बुद्धयः[9]।

[८६७] जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधाया ह्रस्व[10] इत्येतस्मात्। (म. भा. ३. ३४१)

इतः प्रकरणात् प्रभृति छन्दसि वा इति वक्तव्यम्। किं प्रयोजनम् ? अम्बे, दर्वि, शतक्रत्वः, पश्वे नृभ्यः, किकिदीव्या। अम्बे, अम्ब। पूर्णा दर्वि, पूर्णा दर्वी। अधा शतक्रत्वः, शतक्रतवः। पश्वे नृभ्यः, पशवे। किकिदीव्या, किकिदीविना॥

---

1. नद्याश्च क. 3. हे गौरि ब. क. ड, किशोरि ह. 3. हे अम्बे, हे अम्ब ह. 4–5. नास्ति इ. 6. अभीष्टः ह. 7. ह्रस्वान्तस्याङ्गस्य नास्ति ब. 8. पटवः नास्ति ब. 9. ह्रस्वस्य इत्येव, ग्रामण्यः इत्यधिकम् क. 10. इत्येतस्मात् नास्ति ब.